Ex/CBCS/Sans/UG/DSE/5.2.1/2023

# BACHELOR OF ARTS EXAMINATION, 2023

(3rd Year, 5th Semester)

## SANSKRIT (Honours)

## COURSE – DSE (5.2.1)

## [ Nīti Literature ]

Time : Two hours Full Marks : 30

*The figures in the margin indicate full marks.*

### विभागः–क

१। सुरगिरा देवनागर्या लिप्या निम्नोक्तानां **पञ्च प्रश्नाः** समाधेयाः। 1×4

क) कवीश्वराणां गुणाः उल्लिख्यन्ताम्।

ख) सत्सङ्गतेः किं फलं स्यात्?

ग) मनस्विनः कीदृशी वृत्तिः?

घ) वित्तस्य कीदृश्यः गतयः?

ङ) तुषाराद्रेः पुत्रस्य नाम किम्? स किमकरोत्?

च) मध्यमजनानां स्वरूपं किम्?

२। नीतिशतके या विद्यायाः प्रशस्तिः प्राप्यते तस्याः माहात्म्यं विचार्यताम्। 5

अथवा

महतामाचरणं कर्म वा नीतिशतकानुसारमालोच्यताम्।

३। **द्वयोः** व्याख्या कार्या। 3×2

क) दाक्षिण्यं स्वजने दया परजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने नयो नृपजने विद्वज्जनेऽप्यार्जवम्।

शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता।
ये चैवं **पुरुषाः** कलासु कुशलास्तेष्वेव लोकस्थितिः॥

ख) यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान् गुणज्ञः।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ते॥

ग) दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालना-
द्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात्।
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रया—
न्मैत्री चाप्रणयात् समृद्धिरनयात्त्यागप्रमादाद्धनम्॥

**विभागः-ख**

४। सुरगिरा देवनागर्या लिप्या निम्नोक्तानां **पञ्च प्रश्नाः** समाधेयाः। 1×4

क) केन प्रकारेण दिवसोऽबन्ध्यः करणीयः?

ख) विनाग्निना के प्रदहन्ति कार्यम्?

ग) कुत्र श्रीः स्वयमागता?

घ) मर्त्येषु जन्मजन्मनि कस्य केवलं मरणं स्यात्?

ङ) गर्भस्थस्यैव देहिनः कानि सृज्यन्ते?

च) संसारतापदग्धानां के त्रयः विश्रान्तिहेतवः?

५। दुर्जनस्य स्वरूपं चाणक्यनीतिदर्पणे यथा वर्णितं तथालोच्यताम्। 5

अथवा

पुत्रमुलक्ष्य चाणक्यनीतेरुपदेशानां गुरुत्वं निरूप्यताम्।



६। **द्वयोः** व्याख्या कार्या। 3×2

क) नदीतीरे च ये वृक्षाः परगेहेषु कामिनी।
मन्त्रिहीनाश्च राजानः शीघ्रं नश्यन्त्यसंशयम्।

ख) आचारः कुलमाख्याति देशमाख्याति भाषणम्।
सम्भ्रमः स्नेहमाख्याति वपुराख्याति भोजनम्॥

ग) उद्योगे नास्ति दारिद्र्यं जपतो नास्ति पातकम्।
मौने च कलहो नास्ति नास्ति जागरिते भयम्॥